# महर्षेः दयानन्दस्य प्राजातान्त्रिकं दर्शनम्

**पूर्णचन्द्रउपाध्यायः**

**यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।**
**अभ्युत्थानमधर्मस्य तदात्मानं सजाम्यहम्।।**[1]

प्राच्यसंस्कतेः पवित्रतमायां सकलशास्त्रसारभूतायाञ्च ग्रन्थकौमुद्यां श्री मद्भगवदगीतायां स्वयं पुरुषोत्तमेन भगवता श्रीकष्णेन निगदितं पद्यमिदमुपर्युक्तं प्रमाणयति प्रसादयति च सतां चेतांसि यद् युगे–युगे एव सष्टिसर्जकेनालौकिकसत्तात्मकेन परमात्मना इह लोके किमपि विशिष्टं प्रयोजनं दुष्टदलनशिष्टपालनात्मकं सामाजिकं समुत्थानमुद्दिश्य एव कवचिदंशावतारत्वेन क्वचिच्च गुणावतारत्वेन पञ्चमहाभूतात्मकं स्थूलशरीरमाश्रियते। तदेवं कलौ युगे तु दिव्यस्वरूपकस्य परमात्मनः गुणावतारेषु बहुविधेष्वन्यतममेव सकलतापमौलि भूतस्य महर्षेः दयानन्दस्य स्वरूपावधारणमिति तच्चरितसमीक्षकाणां सारस्वतसाधकानामैकमत्यम्।

आर्यसमाजसंस्थापकस्य महर्षेः दयानन्दस्य कर्त्तत्वं व्यक्तित्वं च बहुमुखि–प्रातिभ्यान्विते नात्र क्वचिदपि संशीतिः। स्वामी दयानन्दो सौ एकाधारेण महान् धर्माचार्यः, मर्धसंशोधकः, वैदिकधर्मप्रचारकः, समाजसंशोधकः, समाजशास्त्री, शिक्षाशास्त्री, राष्ट्रियनेता च आसीदेव, अपि चासौ महान् संस्कतज्ञः राजनीतिज्ञः, प्राजातान्त्रिकव्यवस्थायाः सुदढः पक्षधरः आसीदिति तत्प्रणीतसुप्रसिद्धसत्यार्थप्रकाशस्य कालजयिग्रन्थस्य, ऋग्वेदादिभाष्यभूमिकायाः, आचार्य श्रीरमाकान्तप्रणीत–श्रीदयानन्दचरित महाकाव्यस्य च समीक्षणात्परिज्ञायते।

एकोनविंशतिशतकस्योत्तरार्धस्तु प्राच्यसंस्कतेः, सनातनधर्मस्य, सार्थकनाम्नः भारतवर्षस्य च कते स्वर्णिमकाल आसीत्। यतोहि १८२४ ईसवीये प्रतिष्ठिते औदिच्यब्राह्मणपरिवारे गुजरातप्रान्तस्य मोरवीनाम्नि स्थाने भवत्, शैशवमभिधानमस्य मूलशङ्कर आसीत्। परमसत्तायां समर्पिता त्मा प्यसौ मूर्त्तिपूजायाः प्रबलविरोधी आसीत्।

स्वामिना दयानन्देनैव सर्वप्रथमं स्वराज्यस्य, स्वशासनस्य, स्वदेशिभावनायाश्च प्रचारः प्रतिजनं प्रसारितः। तदस्य महर्षेः प्राजातान्त्रिकं दर्शनन्तु सर्वथा उच्चकोटिकं सदुत्तमराष्ट्रस्य परिकल्पनां सफलीकर्त्तुं सततं

प्रयत्नशीलं परिलक्ष्यते। यथा धुनिककाले स्मिन्स्वतन्त्रभारतभूमौ प्राजातान्त्रिकव्यवस्थायामस्माकं राष्ट्रस्य सुपरिचालनार्थं लोकसभा–राज्यसभा–विधानसभा चेति सभात्रयस्य परिकल्पनं प्रामुख्येनैव परिलक्ष्यते, तथैव वैदिककाले पि प्राचीनभारतभूमौ आर्यराजसभा, आर्यविद्यासभा, आर्यधर्मसभा चेत्येतत्सभात्रय[२]–परिकल्पनमासीदिति वेदप्रतिपाद्यं समर्थ्यते स्वकीये ग्रन्थे सत्यार्थप्रकाशे, ऋग्वेदादिभाष्यभूमिकायां च। तदिदं तथ्यमाचार्यरमाकान्तप्रणीत श्रीदयानन्दचरितमहाकाव्ये पि प्रतिपादितं यत्, प्रजाभिः सह मिलित्वा पूर्व राष्ट्रपतिना सभात्रयस्य संरचनं कार्यम्[३]। तदत्र महर्षेः ऐक्यविरोधिकुनीतिनिरास भावना प्रतिफलति। अपि च प्रजाजनैः, राज्सयभायाः सदस्यैः, पार्षदैश्च परस्परं राष्ट्रपतिना राष्ट्राध्यक्षेण वा साकमभिमन्त्रणपूर्वकमेव राष्ट्रहिताय प्रयतितव्यमिति व्यपदिष्टं स्वामिना।

राजधर्मस्य संरक्षणात्मकं दर्शनमपि स्पष्टरूपेणैव परिलक्ष्यते। तद्धि– ''तं सभा च समितिश्च सेना च''[४] इति। मन्त्रस्यास्य भावस्तु सुस्पष्टो यं यत्, सभात्रयं, समितिः नाम सङ्ग्रामादिव्यवस्था, सेना चेति व्यवस्थातयमेतन्मिलित्वैव राजधर्मस्य संरक्षणं कुर्यादिति। तत्र पुनः कस्यचिच्छासकस्य स्वेच्छाचारिताया अवरोधार्थं तदेकाधिकारत्वं निराकतम्। एतदर्थमियं व्यवस्था व्यवस्थापिता यत्, सभायाः नियन्त्रणं राज्ञा सभापतिना वा क्रियेत, सभाध्यक्षश्च सभाधीनः, अपि च सभापतिः सभा चोत्रे प्रजाधीने स्याताम्। प्रजा च राजसभाधीना स्यादिति[५]। तदेवं प्रजातन्त्रस्य सर्वथा अनियन्त्रितत्वं यथा न स्यात्, तथा परिकल्पितं प्राचीनैः वैदिकगदपिभिरिति दयानन्दस्याभिमतम्।

राज्यस्यार्थिकीं स्थितिं सुदढीकर्त्तुमेव प्राचीनभारते या करग्रहण व्यवस्था प्राचीनैः शास्त्रकारैः निर्धारिता, तदनुकुर्वता एव स्वामिना दयानन्देन मनुप्रणीतमुदन्तजातं समर्थितम्। उक्तञ्च प्रसङ्गे स्मिन् –

**''यथा ल्पमदन्त्या द्यं वार्य्योकोवत्सषट्पदाः।**
**तथा ल्पा ल्पो ग्रहीतव्यो राष्ट्राद्राज्ञाब्दिकः करः।।**[६]

तदस्मात्पद्यात्त्थयमिदं प्रमाणीभवति यत्, राज्ञा प्रजाभ्यः प्रमाणाधिकः करः नैव ग्राह्यः, तावानेव करः ग्राह्यः, येन तासामार्थिकी दशा दयनीया न

भवेत्। सेयं करादानव्यवस्था सर्वथा प्राजातान्त्रिकं वैचारिकं दर्शनं सुदढीकरोति। तदत्र प्रजाभ्यं करादानव्यवस्थायामुक्तं मनुना यत् –

**''पञ्चाशदभाग आदेयो राज्ञा पशुहिरण्ययोः।**
**धान्यानामष्टमो भागः षष्ठो द्वादश एव वा।।**[७]

तत्रैव पुनः, सत्यार्थप्रकाशे स्वामिना प्रजानां हितसाधनार्थम् अष्टादशविवादास्पदमार्गेषु राज्ञः, राजपुरुषस्य, सभायाश्च कते मिलितरूपेणैव कर्त्तव्यं निर्धारितम्। सत्यार्थप्रकाश एव दण्डविधानप्रसङ्गे प्रश्नोत्तरशैल्या यन्तथ्यं प्रतिपादयिषितं, तत्तु सर्वमेव प्राजातान्त्रिकं संविधानमादधतीति तथ्यमिदं निम्नाङ्कितं प्रमाणयति। तद्यथा– अपराधिनः राज्ञः न्यायाधीशस्य वा कस्तावद्दण्डविधाता इति जिज्ञासायां तत्रैवोक्तं यत् – सभा एव तद्दण्डविधाना[८] इति। प्राजातान्तित्रकव्यवस्थायामस्यां राजसभाप्रबन्धानुसारं प्रजानां सुपरिपालनमेव शासकस्य नेतुः प्रमुखं कर्त्तव्यम्। तेनैव तस्य साम्राज्यकारित्वं शासकत्वं वा सिद्ध्यति[९]। राष्ट्राध्यक्षेण राष्ट्रपतिना वा स्वशासन तन्त्रं तथा सुव्यवस्थापनीयं, येन तद्राज्ये चौर्यादीनां, परदारागमनादीनां दुराचाराणां च सर्वथा प्रतिबन्धो भवेत्। कषिबलन्तु राष्ट्रस्यार्थिकमेरुदण्डभूतं सन्महाशक्तेः परिपोषकमिति मनुते स्म प्रदपिः दयानन्दः।

साम्प्रदायिकता तु राष्ट्रस्याखण्डता विधटनकारिणीनि साधु जानाति स्म दयानन्दः। अतस्तेनोपदिष्टं राजसत्तायै यत्, साम्प्रदायिकता, मतभेदात्मकता वा यथा न समुत्पद्येत, तदर्थं राष्ट्रपतिना प्रयत्नः करणीयः।[१०] स्वराज्यतन्त्रव्यवस्थायां तत्र मन्त्रिपरिषदः कल्पना पि सर्वथा दयानन्दस्य प्राजातान्त्रिकीं व्यवस्थापनां प्रकटमति। उल्लिखितं चात्रोपाध्यायश्रीरमाकान्तेन स्वमहाकाव्ये यथा –

**स्वराज्यदेशप्रसवाः परीक्षिताः**
**वेदादिवित्ताः सफलाः स्वकर्मसु।**
**सप्ताष्ट वा ते सचिवाः सभासदः**
**नियोजिताः स्युः शुभनीतिकोविदः।।**[११]

तदेवं तत्तत्साहित्य जातपरिशीलनेन सुष्ठु ज्ञायते यत्, महर्षेः दयानन्दस्य प्राजातान्त्रिकं दर्शनं सर्वथा भिनवं चिन्तनं प्रगुणीकरोतीति निश्चप्रचम्।

***संस्कतविभागाध्यक्षः***
*राजकीय महाविद्यालयः,*
*भवानीमण्डी (राज.)*

**सन्दर्भसूची :-**

---

[१] श्रीमद्भगवद्गीता ४/७

[२] त्रीणि राजाना विदथे पुरुणि।
परि विश्वानि भूषथः सदांसि।। (जद.मं. ३/सू. ३८)

[३] प्रजास्तथा राष्ट्रपतिश्च सङ्गताःसभाश्च तिस्रो विधिना प्रकुर्वताम्।
विद्यार्यधर्मार्यसभे उभे तथा राजार्यनाम्नीच ततीयसंख्यया।।
(रमाकान्तप्रणीतं श्रीदया.च.म. १३/२४)

[४] अथर्व. कां. १५/अनु. २/सू. ६

[५] सत्यार्थप्रकाशः षष्ठसमुल्लासः – प.सं. ६३

[६] सत्यार्थप्रकाशः षष्ठसमुल्लासः प.सं. १०३ तथा मनु. ७/१२६

[७] मनु. ७/१६० तथा सत्या.प्र. षष्ठसमुल्लासः प.सं. १०६

[८] सत्यार्यप्रकाशः प.सं. ११४

[९] क्षत्रं वै स्विष्टकत।। क्षत्रं वै साम। साम्राज्यं वै साम
(गदग्वेदादिभाष्यभूमिका राजप्रजाधर्म–विषयः –१०, प.सं. २८६ तथा श.कां. १२/अ. ८/ब्रा.३)

[१०] न सम्प्रदाया मतभेददायका
भवन्त्यभव्या भवभीतिकारकाः
न हिंसकाः वा परवन्तघातिनो
यदा तदा राष्ट्रपतिः सुखायते।। (श्रीदया.च.म.का. १३/३०)

[११] स्वराज्यदेशप्रसवाः परीक्षिताः
वेदादिवित्ताः सफलाः स्वकर्मसु।
सप्ताष्ट वा ते सचिवाः सभासदः
नियोजिताः स्युः शुभनीतिकोविदः।। (श्रीदया.च.म.का. १३/३०)

———०००———